Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २४१
मे - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

आतपः पतति

ग्रीष्मकालस्य अपरं साहित्यिकं नाम वर्तते–निदाघः। निदाघस्य वर्णनं वेदेषु दृश्यते ? अहं न जानामि। परन्तु हरीन्द्रनाथः चट्टोपाध्यायः Feast of Youth काव्यसङ्ग्रहे लिखति यत् निदाघस्य मध्याह्नकालः कश्चित् हिंसकः कुक्कुरः अस्ति। सः आकाशे धावति। जिह्वां मुखात् बहिः लम्बयति। ततः ज्वाला निःसरति। सः कुक्कुरः कस्य ? सूर्यस्य वा यमस्य वा ? यमः कुक्कुरान् गृहीत्वा नित्यम् अटति। सः यमः सूर्यात् एव तान् कुक्कुरान् लब्धवान् इति शङ्के।

कालिदासः ऋतुसंहारे लिखति यत् निदाघस्य औष्ण्यम् असहमानः मूषकः सर्पस्य फणायाम् छायाम् अन्विष्यति। प्रसङ्गवशात् दुर्वाससः भ्रातुः विश्वामित्रस्य कथा अपि स्मरणपथम् आयाति। सः हरिश्चन्द्रं परीक्षितुं भानुं प्रसभं तापितवान्। तथापि हरिश्चन्द्रस्य सत्यं म्लानं नैव अभवत्। न च रोहितः विचलितः जातः।

ग्रीष्मकालीनः प्रचण्डः तापः मुनीनाम् अपि धैर्यं परीक्षितुं शक्नोति। तथापि मह्यं तापः रोचते। तापस्य वर्णः कः स्यात् ? कोऽपि स्यात्, सः मह्यं रोचते। केषुचित् वस्तुषु अस्माकं ताटस्थ्यं शिथिलं भवति। तेन कारणेन तेषां सौन्दर्यं प्रति अस्माकं ध्यानं न भवति। तडागेषु प्रसृतं शैवालं वयं पश्यामः। तत्रत्यं जलं पेयं न भवति इति सत्यम्, किन्तु शैवालस्य शोभा स्वल्पा नास्ति। स्वार्थबुद्धिः मनुष्यः सर्वत्र उपयोगिताम् एव पश्यति। ततः सः सौन्दर्यस्य मर्म पारयितुं न शक्नोति।

भाषाशास्त्रिणः किमपि वदेयुः, गुर्जरभाषायाः अनुबन्धेन तु 'आतपः पतति' इत्येव प्रयोगः शोभते। एतादृशः पतन् आतपः आकाशस्य शोभां वर्धयति। महिषी दोहनकाले नेत्रे निमील्य निष्कम्पं तिष्ठति। तथैव गगनदेवता अपि निस्तब्धा सती आतपस्य धाराः मुञ्चति। तदानीम् अभ्रं न दृश्यते। न च चन्द्रस्य दर्शनं भवति। क्वचित् चन्द्रः दृश्यते चेदपि सः दरिद्रचारुदत्तः इव आकाशस्य एकदेशे तिष्ठति। अस्मिन् काले खलु एकः एव रसः सर्वत्र प्रसरति। सः कः ? वीरः रौद्रः वा ? सः शान्तरसः इति मन्ये। शान्तरसः शीतलः एव भवति इति केन उक्तम् ? सः उष्णः अपि भवति। गीष्मकालीने मध्याह्ने आतपस्य शासनं भृशं तपति, तथापि तत्र पवनस्य प्रतिष्ठा, भक्तस्य अव्यभिचारिणी भक्तिः इव, अक्षुण्णा एव तिष्ठति। आतपे अपि आनन्दयात्रा कथं कर्तव्या इति पवनः सम्यक् जानाति। सः सर्वत्र स्वच्छन्दं धावति। नदीनां प्रवाहेषु धावति। पर्वतानां शिखरेषु धावति। समुद्रस्य तरङ्गेषु धावति। मरुभूमेः सिकतासु अपि धावति। सः अविश्रान्तं धावति। सः निर्बाधं धावति। सः वृक्षात् वृक्षं धावति। सः वृक्षाणां समीपं गत्वा सविनयं पृच्छति – 'कच्चित् तपो वर्धते ?' ध्यानस्थाः मुनयः इव स्थिताः वृक्षाः अपि मस्तकं दोलयित्वा उत्तरं सूचयन्ति – 'अवश्यम् अवश्यम्!'

पक्षिभिः कृतः उपकारः

✍ सुरभिः श्रीवास्तव्



जबालपुरनामके ग्रामे रघुः मनुः चेति मित्रद्वयं निवसति स्म। रघुः कृषिकार्येण आजीविकां निर्वहति स्म, मनुः च वाणिज्येन। मनुः वाणिज्ये महतीं हानिम् अनुभूय निर्धनः अभवत्। तदीयः धनराशिः हिमखण्डवत् अदृश्यः अभवत्। एतादृशस्थितौ सः मित्रस्य रघोः समीपं गत्वा साहाय्यं याचितवान्। रघुः मनोः कृते एक-एकरप्रमाणकस्य क्षेत्रस्य दानेन न्यरूपयत् यत् आवयोः मैत्री कृष्णसुदाममैत्रीसमाना इति।

रघोः सकाशात् प्राप्ते कृषिक्षेत्रे मनुः कर्षणम् आरब्धवान्। तदा एकत्र तेन कश्चन कलशः प्राप्तः, यः सुवर्णाभूषणैः पूर्णः आसीत्। कलशस्य प्राप्त्यनुक्षणं सः 'एतम् अहं रघवे अर्पयामि' इति विचिन्त्य तस्य गृहम् अगच्छत्।

प्रवृत्तं श्रुत्वा रघुः उक्तवान् - ''यतः भवते दत्ते क्षेत्रे प्राप्तम्, अतः तत् भवदीयम् एव। तस्य उपयोगे पूर्णः अधिकारः भवतः एव'' इति। 'कलशः भवदीयः, न तु मदीयः' इति उभौ अपि परस्परं वदतः स्म।

ग्रामजनाः एतौ उक्तवन्तः - 'एतस्य परिहाराय दूरस्थे ग्रामे वसतः ग्रामाधिकारिणः निकटं गच्छताम्' इति। तदनुगुणं तौ पार्श्वग्रामस्थस्य अधिकारिणः रामलालस्य समीपं गतवन्तौ। एकान्ते रामलालं रघुः अवदत् - ''श्रीमन्! मनुः महास्वाभिमानी। क्षेत्रम् अतिरिच्य अन्यविधं साहाय्यं सः न इच्छति इति जानन् अहं स्वयम् एव मम पत्न्याः सुशीलायाः पुत्र्याः सङ्गीतायाः च आभूषणानि कलशे पूरयित्वा तं कलशं तस्य क्षेत्रे भूमौ स्थापितवान् आसम्'' इति।

अनन्तरदिने रामलालः निर्णयम् अश्रावयत् - ''लब्धं निधिं मनुः एव स्वीकुर्यात्। जगति विद्यमानानां समीचीनसस्यानां, फलानां च बीजानि सम्पाद्य तस्मिन् क्षेत्रे वपनेन सः कस्याश्चित् रमणीयायाः वाटिकायाः निर्माणं करोतु। अवशिष्टेन धनेन पुनः वाणिज्यम् आरभ्य अनुभवेन लाभः प्राप्यताम्'' इति।

रामलालस्य अनुज्ञया रघोः मनोः च आशीर्वादेन च मनोः पुत्रः सूर्यः निश्चितवान् यत् कानिचन आभूषणानि स्वीकृत्य नगरं गत्वा विक्रीय बीजानि क्रीत्वा उत्तमानां फल-पुष्पाणां वर्धनं करणीयम् इति। नगरं गच्छता तेन मार्गे बहुविधान् सुन्दरान् पक्षिणः पञ्जरैः नयन् व्याधः कश्चन अवलोकितः।

सूर्यः व्याधम् अवदत् - ''भोः, एतानि आभूषणानि स्वीकृत्य भवतः सर्वान् पक्षिणः मह्यं ददातु'' इति। व्याधः महता सन्तोषेण आभरणानि स्वीकृत्य पक्षिणः तस्मै समर्पितवान्। सूर्यः सर्वान् पक्षिणः मुक्तान् कृतवान्। अनन्तरं नगरं गत्वा तत्र कस्यचित् धनिनः समीपे उद्योगे लग्नः अभवत् सः।

द्वित्राणि वर्षाणि यावत् सूर्यः नगरे कठिनपरिश्रमं कृतवान्। परिश्रमेण महान्तं धनराशिं सङ्गृह्य सः ग्रामम् आगतवान्।

रघुः मनुः च तस्य गृहे उपविश्य सम्भाषमाणौ आस्ताम्। मनुः रघोः हस्तौ गृहीत्वा सहर्षम् अवदत् – ‘‘न जाने, जगतः विविधाः पक्षिणः कुतश्चित् अस्माकं क्षेत्रम् आगत्य विविधबीजपातनेन अनेकप्रकारकाणां पुष्पाणां फलानां च वृक्षस्य वर्धने कारणीभूताः अभवन्। ततश्च तेन क्षेत्रेण मनोरमा वाटिका इति ख्यातिः प्राप्ता अस्ति’’ इति।

एतत् श्रुत्वा सूर्यः पितरम् अवदत् –‘‘एतत्सर्वं पञ्जरस्थानां देवपक्षिणां कार्यम् । अवश्यं ते पक्षिणः देवलोकात् एव आगताः स्युः, येषां मोचनेन मया पुण्यं सम्पादितं, वृक्षवर्धने तेषां सहयोगः च प्राप्तः। महता परिश्रमेण सम्पादितं धनम् अपि मत्सकाशे एव अस्ति। एतस्य उपयोगे अधिकारः भवतः एव’’ इति। एतत् श्रुत्वा रघुः मनुः च नितरां तुष्टौ अभवताम्।

तदनन्तरदिने मनुः पुत्रेण सह रघोः गृहं गत्वा उक्तवान् – ‘‘मित्र। मम पुत्रस्य, भवतः पुत्र्याः सङ्गीतायाः च पाणिग्रहणनिश्चयार्थम् आगतवान् अस्मि। भवान् किम् एतत् अनुमन्येत ?’’ इति।

परमसन्तुष्टः रघुः मनोः प्रस्तावं सहर्षम् अङ्गीकृतवान्। ग्रामाधिकारी रामलालः एतां वार्ता श्रुत्वा – ‘‘महतः सन्तोषस्य विषयः एषः। भवतोः स्नेहः बान्धव्यकारणं जातः इत्येतत् युक्तम् एव’’ इति अवदत्।

उद्बन्धकरज्जोः मूल्यं दातव्यं भवता

रत्नाकरः यदा देवपुरग्रामम् आगतवान् तदा तु अकिञ्चनः एव आसीत्। किन्तु अद्य महाधनिकेषु अन्यतमः सः। अहोरात्रं परिश्रमः यः कृतः तस्यैव फलम् एतत् इति सदा वदन् भवति स्म सः। किन्तु ग्रामीणाः तद्विषये वदन्ति स्म यत् सः महाकृपणः, निर्धनानां रक्तं पीत्वा एतत् धनं सम्पादितं तेन इति। प्रयोजनरहितः वृक्ष इव सः इति तेषां निर्णयः आसीत्।

कदाचित् देवपुरपरिसरे समीचीना वृष्टिः जाता। धान्यानां मूल्यम् अपि यथायोग्यं प्राप्तं कृषिकैः। अतः सर्वे कृषिकाः यथासमयं धान्यानि विक्रीय धनं प्राप्तवन्तः। किन्तु रत्नाकरः तथा न कृतवान्। इतोऽपि अधिकं मूल्यं प्राप्येत इति विचिन्त्य सः धान्यं गृहे एव रक्षितवान्।

किन्तु दिनानि यथा यथा गतानि तथा तथा धान्यानां मूल्ये महान् ह्रासः एव जातः । एतस्मात् रत्नाकरः धैर्यच्युतः जातः । सम्भाव्यां हानिं मनसि आकलय्य सः नितरां दिग्भ्रान्तः । अतः सः आत्महत्यां सङ्कल्प्य धेनुबन्धनरज्जुं गृहीत्वा ग्रामात् बहिः गत्वा वृक्षे आत्मनः उद्बन्धनं कृतवान्। तावता तत्र आगतः देवदासः नाम कश्चन सेवकः एतत् दृष्ट्वा झटिति अग्रे गत्वा रज्जुं लवित्रेण छिन्नवान्। रत्नाकरं भूमौ शाययित्वा तस्य मुखस्य उपरि जलसेचनं कृतवान्। नेत्रे उन्मीलितवान् रत्नाकरः परितः सकृत् दृष्ट्वा पार्श्वस्थं देवदासम् अवदत् –‘‘भोः, मया भावितम् आसीत् यत् एषा सामान्या रज्जुः इति। एषा तु अधिकमूल्या रज्जुः। एषा छेदिता भवता। तस्मात् एतस्याः मूल्यं दातव्यम् एव। अन्यथा अहं भवन्तं कारागारं प्रति प्रेषयिष्यामि’’ इति।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते ...)

कविकुलगुरुविरचितेषु प्रबन्धेषु एकतमा कृतिः अभिज्ञानशाकुन्तलाभिख्यं नाटकम् । तत्रैतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः । तदनुरोधेन पुण्याश्रमं गतस्य तस्य शकुन्तलायै स्नेहः समुत्पन्नः । कालेन तयोः परस्परम् अनुरागः गाढतरः अभवत् । इष्टिकाले आपद्भ्यो निवारणार्थं ऋषिभिः आहूतः दुष्यन्तः । तत्रैव तान् रक्षन् सः स्थितः । तत्र तयोः गान्धर्वविवाहः जातः । ततः दुर्वासोमुनिशापप्रसङ्गः । कण्वेन दैवाद् दुष्यन्तशकुन्तलयोः विषये ज्ञातम् अनुज्ञातं च । ततः शकुन्तलां सज्जीकृत्य राजकुलाय निर्गताः सर्वे आश्रमाद् निर्गच्छन्तः विरहदुःखम् अनुभवन्ति । क्रमेण राजभवनं प्राप्ताः । राज्ञा सह मन्त्रणां कर्तुं सभां प्रविष्टाः ।

राजा साशङ्कं पृच्छति – ''किमत्रभवती मया परिणीतपूर्वा ।'' शकुन्तला स्तब्धा । गौतमी ताम् अवगुण्ठनम् अपनेतुमादिशति । तां दृष्ट्वा चिन्तयन् अपि दुष्यन्तः तां न स्मरति । शकुन्तला निराशा । शारद्वतेन प्रेरिता शकुन्तला ताभ्यां पुरा व्यतीतं कालं स्मारयति । अङ्गुलीयकं दर्शयितुकामा यदा सा हस्तं पश्यति तदा ज्ञातं यत् शचीतीर्थे उदकं वन्दमानायाः तस्याः हस्ताद् मुद्रिका पतिता । एतत् श्रुत्वा राजा ''इदं तत् प्रत्युत्पन्नमतित्वं स्त्रीणाम्'' इत्यादिकम् उक्त्वा तस्याः वञ्चनत्वम् आक्षिपति । शकुन्तला कुपिता । दुष्यन्तः प्रतिवदति यत् प्रजासु प्रथिते तस्य चरिते न ईदृशः प्रसङ्गः दृश्यते । सा कथयति –

यूयमेव प्रमाणं जानीथ धर्मस्थितिं च लोकस्य ।
लज्जा विनिर्जिता जानन्ति न किमपि महिलाः ॥५।२६॥

इत्युदीर्य वस्त्रान्तेन मुखम् आच्छाद्य सा रोदिति । यदा सर्वेऽपि प्रस्थिताः आश्रमं प्रत्यागन्तुं तदा पुरोधाः विकल्पमेकं दर्शयति । सः राज्ञे निवेदयति यत् पूर्वं साधुनैमित्तिकैः राजा आदिष्टः यत् तस्य चक्रवर्तिलक्षणः तस्य पुत्रः भविष्यतीति । यदि तावत् मुनेः दौहित्रः (शकुन्तलायाः पुत्रः) तल्लक्षणः तर्हि प्रवेशयितुम् अर्हति तां महाराजः । अन्यथा आश्रमगमनं तु स्थितमेव । राजाऽपि यथेष्टमेव कर्तुम् अनुजानाति । राजा श्रान्तः । शयनीयगृहं प्रति चलति मनसि च चिन्तयति –

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्यायतीव मां हृदयम् ॥५।३४॥

अनेन च पञ्चमाङ्कस्य समाप्तिः भवति ।

षष्ठाङ्कः। कश्चिद् धीवरः रक्षकाभ्यां धृतः । राजचिह्नेन मुद्रितम् अङ्गुलीयकं ग्रहणस्य हेतुः । महारत्नमयम् अङ्गुलीयकं तेन कुतः प्राप्तमिति पृष्टे सः कथयति यत् तेन कश्चिद् रोहितमत्स्यः गृहीतः । खण्डशः कृते तस्मिन् महारत्नम् अङ्गुलीयकं प्राप्तम् । क्रमशः राजभवनं नीतः सः राज्ञा मोचितः धनेन च परितोषितः । हृष्टः सः स्वस्थानं गच्छति । इह प्रवेशकं समाप्तं भवति।

(क्रमशः...)

मासवार्त्ता:

सम्पन्नौ संस्कृतभाषाशिक्षणस्य वर्गौ ।

संस्कृतभाषाया: अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-फाउन्डेशनसंस्थानेन संस्कृतभाषाशिक्षणस्य विविधस्तरीया: अभ्यासक्रमा: आयोज्यन्ते । अभ्यासक्रमेऽस्मिन् फरवरीमासस्य २ दिनाङ्कत: एप्रिलमासस्य २९ दिनाङ्कं यावत् संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य द्वितीयस्तरस्य च अभ्यासक्रम: प्राचलत् । अभ्यासक्रमेऽस्मिन् २६ छात्रा: संस्कृतभाषाया: अध्ययनम् अकुर्वन् । डॉ. मिहिर: उपाध्याय: छात्रेभ्य: मार्गदर्शनं प्रायच्छत्।

सम्पन्ना: 'Value Education through Sanskrit' बालसंस्कृतवर्गा: ।

बालका: संस्कृतभाषाया: माध्यमेन भारतीयसंस्कृते: परिचयं प्राप्नुयु: इति लक्ष्यीकृत्य एकलव्य-संस्कृत-फाउन्डेशनसंस्थानेन 'Value Education through Sanskrit' बालसंस्कृतवर्ग: इति अभ्यासक्रम: सञ्चाल्यते। अभ्यासक्रमेऽस्मिन् Skg त: ९ कक्ष्याया: छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति। एतेन अभ्यासक्रमेण बालेषु विविधा: क्षमता: तद्यथा उच्चारणशुद्धि: स्मरणशक्ते: विकास: व्यक्तित्वविकासश्च वर्धिता: भवन्ति। अभ्यासक्रमोऽयं मार्चमासस्य २९ दिनाङ्के सम्पन्न:। अभ्यासक्रमेऽस्मिन् श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेल:, श्रीपारुल: व्यास:, श्रीरागिणी गोवाडिया, सुश्री दिशा परमार: च छात्रेभ्य: मार्गदर्शनं प्रायच्छन् । अत्र उल्लेखनीयं यत् अभ्यासक्रमस्य अन्ते संस्थानेन संस्कृतबालोत्सवस्य आयोजनम् अपि कृतमासीत्।

सम्पन्न: संस्कृतभाषाशिक्षणस्य प्राथमिक: वर्ग: ।

एकलव्य-संस्कृत-फाउन्डेशन एवं च दिव्यजीवन-सांस्कृतिक-सङ्घ:, (शिवानन्दाश्रम:) इत्यनयो: संयुक्तोपक्रमेण जनवरी २४ दिनाङ्कत: एप्रिल २५ दिनाङ्कं यावत् शिवानन्दाश्रमे संस्कृतभाषाशिक्षणस्य आयोजनम् अभवत् । अभ्यासक्रमेऽस्मिन् छात्रा: प्रतिशनिवासरे सायं ६:०० वादनत: ७:३० वादनपर्यन्तं संस्कृतभाषाया: अध्ययनम् अकुर्वन्। वर्गस्य सञ्चालनं दिशा परमार: अकरोत्।

कृपया हसन्तु

नमनः - उत्साहेन एकम् आपणं प्राविशत् ।
नमनः - (आपणिकं प्रति) '१ BHK' इत्यस्य किं मूल्यम् ?
आपणिकः - भो ! एषः वस्त्रस्य आपणः अस्ति ।
नमनः - किन्तु त्वया आपणात् बहिः तु लिखितम् अस्ति 'Flat ५०% off ।'

★ ★ ★ ★ ★

रमणः - (वैद्यम् उद्दिश्य) भोः वैद्य ! मम शिरसि सदा पीडा भवति ।
वैद्यः - त्वं किमपि चिन्तयसि वा ? त्वं चिन्तां करोषि वा ?
रमणः - न, अहं किमपि न चिन्तयामि ।
वैद्यः - एतदेव कारणम् । शून्यमस्तिष्के वायोः प्रकोपः अधिकः भवति ।

★ ★ ★ ★ ★

पिता - हे पुत्र ! परीक्षा कथम् आसीत् ?
पुत्रः - परीक्षा सरला आसीत् ।
पिता - तर्हि चिन्ता नास्ति खलु ?
पुत्रः - प्रश्नाः तु सरलाः आसन्, चिन्ता तु उत्तराणां विषये अस्ति ।

★ ★ ★ ★ ★

माता - (पुत्रं प्रति) भोः वत्स ! त्वं किमर्थं चिन्तितः असि ?
पुत्रः - श्वः परीक्षा अस्ति ।
माता - तर्हि पठ ।
पुत्रः - यदि अहं पठनस्य आरम्भं करिष्यामि, तर्हि अहं ज्ञास्यामि यत् किमपि न जानामि !!

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥

तात्पर्यम् – इयं भूमिः सत्येन एव धृता अस्ति । सूर्यः सत्येन एव तपति । वायुः सञ्चरति सत्यस्य आधारे एव । जगति विद्यमानं सर्वमपि सत्ये एव प्रतिष्ठितम् अस्ति । सत्यमेव सर्वस्य आधारभूतं शक्तिभूतं च । अतः अस्माभिः सत्यम् उपासितव्यम् ।

सदयं हृदयं यस्य भाषितं सत्यभूषितम् ।
कायः परहिते यस्य कलिस्तस्य करोति किम् ॥

तात्पर्यम् – यस्य मनः दयापूर्णं यः सत्यभाषी यः परोपकाराय एव स्वस्य शरीरम् उपयुङ्क्ते सः कदापि कलेः प्रभावेण स्पृष्टः न भवति ।

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥

तात्पर्यम् – मनुष्यः सज्जनैः सह एव निवासं कुर्यात् । सज्जनैः सह एव मित्रतां कुर्यात् । दुर्जनैः सह किमपि न व्यवहरेत् ।

ज्ञानसरित्

श्यामः पटेलः

मुखभवजलम् – लाला – भोज्यवस्तूनां दर्शनेन यः रसः मुखे प्रभवति सः अस्ति लाला। केचन विना कारणं लालारसं ष्ठीव्यन्ति। तन्न शरीराय योग्यं वर्तते। न तु शिष्टाचारयोग्यमपि। इयं लाला शरीरस्य अन्यस्त्रावाणाम् अपेक्षया अतीव महत्त्वं विदधाति। यतो हि अनया एव भोजनं जीर्यति। ततः शरीरं शक्तिं प्राप्य अन्यस्त्रावान् स्त्रावयति।

एषा लाला पाचनक्रियायां महती उपयोगिनी वर्तते। यदा मुखे भुक्तान्नस्य ग्रासस्य चर्वणं भवति तदा खाद्यवस्तुना सह लालायाः मेलनं भवति। ततः लालायाः श्लेष्मत्वात् कवलः निगरणयोग्यः भवति। खाद्यान्ने स्थितस्य कार्बोहाइड्रेट्स इत्यनेन सह लालायाः संयोजनं भवति। तदनु कार्बोहाइड्रेट्स इत्यस्य शर्करायां परिवर्तनं भवति। तेनैव तस्याः शर्करायाः उदरे सम्यक्तया पाचनं भवितुं शक्यते। अतः अधिकं चर्वणं कुर्मः चेत् मधुररसस्य अनुभूतिर्भवति। तदा एव पाचनप्रक्रियायाः त्रिंशत् प्रतिशतं कार्यं मुखे सम्पन्नं भवति।

आयुर्वेदानुसारं तु भक्ष्यान्नं चर्वणेन द्रवरूपं कृत्वा भोक्तव्यं तथा पेयद्रव्यस्य निगरणं न, चर्वणं कृत्वा अल्पशः पानं कर्तव्यम् इति। येन पेयद्रव्येन सह अपि लालासंयोजनं भवेत्। भवतु, पर्याप्तमेतावत्। भोजनस्य स्मरणेन ममापि मुखे इदानीं लाला स्त्रवति!

शब्दमञ्जूषा

उपधूपितः	धूनित किया गया	fumigated
व्याक्षेपः	इधर उधर उछालना	tossing about
धरा	पृथ्वी	earth
जुकुटः	श्वान	dog
आविलः	पंकिल	turbid
विकरालः	भयानक	frightful
समुत्सारणम्	हांक देना	driving away
संश्यानः	संकुचित	contracted
सौगन्धिकः	सुगंधित	fragrant
शूरः	शौर्यवान्	brave
परिशब्दितः	संप्रेषित	mentioned
उद्वीक्षणम्	ऊपर देखना	looking up
विशङ्कटः	बड़ा	great
विलोलः	दोलायमान	shaking about
पक्षता	मित्रता	alliance

किं भवन्तः जानन्ति ?

१) पञ्जाबप्रदेशस्य नृत्यशैली का वर्तते?

(क) गरबा (ख) ओडिसी (ग) लंबाड़ी (घ) भाँगड़ा

२) 'भरमर' इति कस्य राज्यस्य नृत्यशैली अस्ति?

(क) पञ्जाबस्य (ख) गुजरातस्य (ग) राजस्थानस्य (घ) केरलस्य

३) 'क्वाँग' 'शब्बू' च इत्यनयोः नृत्यशैल्योः सम्बन्धः केन सह वर्तते?

(क) गुजरातेन (ख) उत्तरप्रदेशेन (ग) हिमाचलेन (घ) काश्मीरेण

४) असमस्य प्रसिद्धा नृत्यशैली का वर्तते?

(क) लम्बाड़ी (ख) लास्य (ग) बिहू (घ) भाँगड़ा

५) 'लम्बाड़ी' इति नृत्यशैल्याः सम्बन्धः केन राज्येन सह अस्ति?

(क) आन्ध्रप्रदेशेन (ख) देहल्या (ग) कर्णाटकेन (घ) मध्यप्रदेशेन

६) 'माडिया' इति नृत्यशैल्याः सम्बन्धः केन राज्येन सह वर्तते?

(क) मध्यप्रदेशेन (ख) गुजरातेन (ग) राजस्थानेन (घ) उडीसया

७) 'जब्रो' इति नृत्यशैली केन क्षेत्रेण सह सम्बद्धा वर्तते?

(क) लद्दाखेन (ख) मेघालयेन (ग) असमेन (घ) अरुणाचलेन

उत्तराणि – (१) घ (२) ग (३) ग (४) ग (५) क (६) क (७) क

अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT FOUNDATION
|| जयतु संस्कृतं जयतु भारतम् ||

(Offline)

Value Education Through Sanskrit

बालसंस्कृतवर्गः

(Class SKg to 8)

Date : 14/6/26 to 28/3/27
Day : Sunday
Time : 11.00am to 12.30pm
Fees : ₹ 8500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

EKLAVYA SANSKRIT FOUNDATION
|| जयतु संस्कृतं जयतु भारतम् ||

(Online / Offline)

Value Education Through Sanskrit

बालसंस्कृतवर्गः

(Class SKg to 8)

Date : 13/6/26 to 27/3/27
Day : Saturday
Time : 6.00pm to 7.30pm
Fees : ₹ 8500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

संस्कृत-
साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

Learn Online

सन्धिः

Date : 02/07/2026 to 30/07/2026
Day : Tuesday-Thursday
Time : 07:00 am to 8:30 am
Fees : Rs. 2500/-

Contact: Dr Mihir Upadhyay, 98246 16237

प्रियवाचकाः

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006